# Shri Shiva Sahasranamavali 1000 Names

# श्रीशिवसहस्रनामावलिः

## Document Information

Text title : Shiva Sahasranamavali 1000 Names from Skandapurana

File name : shivasahasranAmAvaliHskanda.itx

Category : sahasranAmAvalI, shiva

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : See corresponding stotra

Latest update : January 22, 2021, July 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 11, 2023

*sanskritdocuments.org*

# श्रीशिवसहस्रनामावलिः

श्रीगणेशाय नमः ।
श्रीभैरवाय नमः ।
श्रीउमामहेश्वराभ्यां नमः ॥

अस्य श्रीशिवसहस्रनामस्तोत्रमहामन्त्रस्य नारद ऋषिः ।
अनुष्टुप् छन्दः । परमात्मा श्रीशिवो देवता ।
धर्मार्थकाममोक्ष चतुर्विधपुरुषार्थसिध्यर्थे सर्व कर्म(कामना)
सिध्यर्थे सर्व आधि व्याधि निवृत्यर्थे सहस्रनामजपे विनियोगः ॥

ॐ श्रीशिवाय नमः । शिवदाय । भव्याय । भावगम्याय । वृषाकपये ।
वृषध्वजाय । वृषारूढाय । वृषकाय । वृषेश्वराय ।
शिवाधिपाय । शिताय । शम्भवे । स्वयम्भुवे । आत्मविदे ।
विभवे । सर्वज्ञाय । बहुहन्त्रे । भवानीपतये । अच्युताय ।
तन्त्रशास्त्रप्रमोदिने नमः । २०

ॐ तन्त्रशास्त्रप्रदर्शकाय नमः । तन्त्रप्रियाय । तन्त्रगम्याय ।
तन्त्रोवानन्ततन्त्रकाय । तन्त्रीनादप्रियाय । देवाय । भक्ताय
तन्त्रविमोहिताय । तन्त्रात्मने । तन्त्रनिलयाय । तन्त्रदर्शिने ।
सुतन्त्रकाय । महादेवाय । उमाकान्ताय । चन्द्रशेखराय । ईश्वराय ।
धूर्जटये । त्र्यम्बकाय । धूर्ताय । धूर्तशत्रवे । अमावसवे नमः । ४०

ॐ वामदेवाय नमः । मृडाय । शम्भवे । सुरेशाय । दैत्यमर्दनाय ।
अन्धकारहराय । दण्डाय । ज्योतिष्मते । हरिवल्लभाय । गङ्गाधराय ।
रमाकान्ताय । सर्वनाथाय । सुरारिघ्ने । प्रचण्डदैत्यविध्वंसिने ।
जम्भारातये । अरिन्दमाय । दानप्रियाय । दानदाय । दानतृप्ताय ।
दानवान्तकाय नमः । ६०

ॐ करिदानप्रियाय नमः । दानिने । दानात्मने । दानपूजिताय ।
दानगम्याय । ययातये । दयासिन्धवे । दयावहाय । भक्तिगम्याय ।

भक्तसेव्याय । भक्तिसन्तुष्टमानसाय । भक्ताभयप्रदाय ।
भक्ताय । भक्ताभीष्टप्रदायकाय । भानुमते । भानुनेत्राय ।
भानुवृन्दसमप्रभाय । सहस्रभानवे । स्वर्भानवे । आत्मभानवे नमः । ८०

ॐ जयावहाय नमः । जयन्ताय । जयदाय । यज्ञाय । यज्ञात्मने ।
यज्ञविदे । जयाय । जयसेनाय । जयत्सेनाय । विजयाय । विजयप्रियाय ।
जाज्वल्यमानाय । ज्यायसे । जलात्मने । जलजाय । जवाय । पुरातनाय ।
पुरारातये । त्रिपुरघ्नाय । रिपुघ्नकाय नमः । १००

ॐ पुराणाय नमः । पुरुषाय । पुण्याय । पुण्यगम्याय । अतिपुण्यदाय ।
प्रभञ्जनाय । प्रभवे । पूर्णाय । पूर्णदेवाय । प्रतापवते ।
प्रबलाय । अतिबलाय । देवाय । वेदवेद्याय । जनाधिपाय । नरेशाय ।
नारदाय । मानिने । दैत्यमानविमर्दनाय । अमानाय नमः । १२०

ॐ निर्ममाय नमः । मान्याय । मानवाय । मधुसूदनाय । मनुपुत्राय ।
मयारातये । मङ्गलाय । मङ्गलास्पदाय । मालवाय । मलयावासाय ।
महोभये । संयुताय । अनलाय । नलाराध्याय । नीलवाससे । नलात्मने ।
नलपूजिताय । नलाधीशाय । नैगमिकाय । निगमेन सुपूजिताय नमः । १४०

ॐ निगमावेद्यरूपाय नमः । धन्याय । धेनवे । अमित्रघ्ने ।
कल्पवृक्षाय । कामधेनवे । धनुर्धारिणे । महेश्वराय । दामनाय ।
दामिनीकान्ताय । दामोदराय । हरेश्वराय । दमाय । दान्त्रे । दयावते ।
दानवेशाय । दनुप्रियाय । दन्वीश्वराय । दमिने । दन्तिने नमः । १६०

ॐ दन्वाराध्याय नमः । जनुप्रदाय । आनन्दकन्दाय । मन्दारये ।
मन्दारसुमपूजिताय । नित्यानन्दाय । महानन्दाय । रमानन्दाय ।
निराश्रयाय । निर्जराय । निर्जरप्रीताय । निर्जरेश्वरपूजिताय ।
कैलासवासिने । विश्वात्मने । विश्वेशाय । विश्वतत्पराय ।
विश्वम्भराय । विश्वसहाय । विश्वरूपाय । महीधराय नमः । १८०

ॐ केदारनिलयाय नमः । भर्त्रे । धर्त्रे । हर्त्रे । हरीश्वराय ।
विष्णुसेव्याय । जिष्णुनाथाय । जिष्णवे । कृष्णाय । धरापतये ।
बदरीनायकाय । नेत्रे । रामभक्ताय । रमाप्रियाय । रमानाथाय ।
रामसेव्याय । शैब्यापतये । अकल्मषाय । धराधीशाय ।
महानेत्राय नमः । २००

ॐ त्रिनेत्राय नमः । चारुविक्रमाय । त्रिविक्रमाय । विक्रमेशाय ।

त्रिलोकेशाय । त्रयीमयाय । वेदगम्याय । वेदवादिने । वेदात्मने ।
वेदवर्द्धनाय । देवेश्वराय । देवपूज्याय । वेदान्तार्थप्रचारकाय ।
वेदान्तवेद्याय । वैष्णवाय । कवये । काव्यकलाधराय । कालात्मने ।
कालहृते । कालाय नमः । २२०

ॐ कलात्मने नमः । कालसूदनाय । केलीप्रियाय । सुकेलये ।
कलङ्करहिताय । क्रमाय । कर्मकर्त्रे । सुकर्मणे । कर्मेशाय ।
कर्मवर्जिताय । मीमांसाशास्त्रवेत्त्रे । शर्वाय । मीमांसकप्रियाय ।
प्रकृतये । पुरुषाय । पञ्चतत्त्वज्ञाय । ज्ञानिनां वराय ।
साङ्ख्यशास्त्रप्रमोदिने । सङ्ख्यावते । पण्डिताय नमः । २४०

ॐ प्रभवे नमः । असङ्ख्यातगुणग्रामाय । गुणात्मने । गुणवर्जिताय ।
निर्गुणाय । निरहङ्काराय । रसाधीशाय । रसप्रियाय । रसास्वादिने ।
रसावेद्याय । नीरसाय । नीरजप्रियाय । निर्मलाय । निरनुक्रोशिने ।
निर्दन्ताय । निर्भयप्रदाय । गङ्गाख्यतोयाय । मीनध्वजविमर्दनाय ।
अन्धकारिबृहद्दंष्ट्राय । बृहदश्वाय नमः । २६०

ॐ बृहत्तनवे नमः । बृहस्पतये । सुराचार्याय ।
गीर्वाणगणपूजिताय । वासुदेवाय । महाबाहवे । विरूपाक्षाय । विरूपकाय ।
पूष्णः दन्तविनाशिने । मुरारये । भगनेत्रघ्ने । वेदव्यासाय ।
नागहाराय । विषघ्ने । विषनायकाय । विरजसे । सजलाय । अनन्ताय ।
वासुकये । अपराजिताय नमः । २८०

ॐ बालाय नमः । वृद्धाय । यूने । मृत्यवे । मृत्युघ्ने ।
भालचन्द्रकाय । बलभद्राय । बलारातये । दृढधन्वने ।
वृषध्वजाय । प्रमथेशाय । गणपतये । कार्तिकेयाय ।
वृकोदराय । अग्निगर्भाय । अग्निनाभाय । पद्मनाभाय । प्रभाकराय ।
हिरण्यगर्भाय । लोकेशाय नमः । ३००

ॐ वेणुनादाय नमः । प्रतर्दनाय । वायवे, भगाय । वसवे, भर्गाय ।
दक्षाय । प्राचेतसे । मुनये । नादब्रह्मरताय । नादिने । नन्दनावास
अम्बराय । अम्बरीषाय । अम्बुनिलयाय । जामदग्न्याय । परात्पराय ।
कृतवीर्यसुत-राजा-कार्तवीर्यप्रमर्दनाय । जमदग्नये । जातरूपाय ।
जातरूपपरिच्छदाय । कर्पूरगौराय । गौरीशाय नमः । ३२०

ॐ गोपतये नमः । गोपनायकाय । प्राणीश्वराय । प्रमाणज्ञाय ।

अप्रमेयाय । अज्ञाननाशनाय । हंसाय । हंसगतये । मीर्मीनाय ।
ब्रह्मणे । लोकपितामहाय । यमुनाधीश्वराय । याम्याय ।
यमभीतिविमर्दनाय । नारायणाय । नारपूज्याय । वसुवर्णाय ।
वसुप्रियाय । वासवाय । बलघ्ने नमः । ३४०

ॐ वृत्रहन्त्रे नमः । यन्त्रे । पराक्रमिणे । बृहदीशाय ।
बृहद्धानवे । वर्द्धनाय । बालवाय । पराय । शरभाय ।
नरसंहारिणे । कोलशत्रवे । विभाकराय । रथचक्राय । दशरथाय ।
रामाय । शस्त्रभृतां वराय । नारदीयाय । नरानन्दाय । नायकाय ।
प्रमथारिघ्ने नमः । ३६०

ॐ रुद्राय नमः । रौद्रौ रुद्रमुख्याय । रौद्रात्मने । रोमवर्जिताय ।
जलन्धरहराय । हव्याय । हविषे । धाम्ने । बृहद्धविषे । रवये ।
सप्तार्चिषे । अनघाय । द्वादशात्मने । दिवाकराय । प्रद्योतनाय ।
दिनपतये । सप्तसप्तये । मरीचिमते । सोमाय । अब्जाय नमः । ३८०

ॐ ग्लावे नमः । रात्रीशाय । कुजाय । जैवात्रिकाय । बुधाय । शुक्राय ।
दैत्यगुरवे । भौमाय । भीमाय । भीमपराक्रमाय । शनये ।
पङ्गवे । मदान्धाय । भङ्गाभक्षणतत्पराय । राहवे । केतवे ।
सैंहिकेयाय । ग्रहात्मने । ग्रहपूजिताय । नक्षत्रेशाय नमः । ४००

ॐ अश्विनीनाथाय नमः । मैनाकनिलयाय । शुभाय ।
विन्ध्याटवीसमाच्छन्नाय । सेतुबन्धनिकेतनाय । कूर्मपर्वतवासिने ।
वागीशाय । वाग्विदां वराय । योगेश्वराय । महीनाथाय ।
पातालभुवनेश्वराय । काशिनाथाय । नीलकेशाय । हरिकेशाय ।
मनोहराय । उमाकान्ताय । यमारातये । बौद्धपर्वतनायकाय ।
तटासुरनिहन्त्रे । सर्वयज्ञसुपूजिताय नमः । ४२०

ॐ गङ्गाद्वारनिवासाय नमः । वै वीरभद्राय । भयानकाय ।
भानुदत्ताय । भानुनाथाय । जरासन्धविमर्दनाय । यवमालीश्वराय ।
पाराय । गण्डकीनिलयाय । हराय । शालग्रामशिलावासिने ।
नर्मदातटपूजिताय । बाणलिङ्गाय । बाणपित्रे । बाणधये । बाणपूजिताय ।
बाणासुरनिहन्त्रे । रामबाणाय । भयापहाय । रामदूताय नमः । ४४०

ॐ रामनाथाय नमः । रामनारायणाय । अव्ययाय । पार्वतीशाय ।
परामृष्टाय । नारदाय । नारपूजिताय । पर्वतेशाय । पार्वतीशाय ।

पार्वतीप्राणवल्लभाय । सर्वेश्वराय । सर्वकर्त्रे । लोकाध्यक्षाय ।
महामतये । निरालम्बाय । हठाध्यक्षाय । वननाथाय । वनाश्रयाय ।
श्मशानवासिने । दमनाय नमः । ४६०

ॐ मदनारये नमः । मदालयाय । भूतवेतालसर्वस्वाय । स्कन्दाय ।
स्कन्दजनये, जनाय । वेतालशतनाथाय । वेतालशतपूजिताय ।
वेतालाय । भैरवाकाराय । वेतालनिलयाय । बलाय । भुवे । भुवाय ।
स्वस्मै । वषट्काराय । भूतभव्यविभवे । महाय । जनाय । महाय ।
तपाय नमः । ४८०

ॐ सत्याय नमः । पातालनिलयाय । लयाय । पत्रिणे । पुष्पिणे । फलिने ।
तोयिने । महीरूपसमाश्रिताय । स्वधायै । स्वाहायै । नमस्काराय ।
भद्राय । भद्रपतये । भवाय । उमापतये । व्योमकेशाय ।
भीमधन्वने । भयानकाय । पुष्टाय । तुष्टाय नमः । ५००

ॐ धराधाराय नमः । बलिदाय । बलिभृते । बलिने । ओङ्काराय ।
नृमयाय । मायिने । विघ्नहर्त्रे । गणाधिपाय । ह्रीं ह्रौं गम्याय ।
हौं जूँ तस्मै । हौं शिवाय नमः । ज्वराय । द्राँ द्राँ रूपाय ।
दुराधर्षाय । नादबिन्द्वात्मकाय । अनिलाय । रस्ताराय । नेत्रनादाय ।
चण्डीशाय नमः । ५२०

ॐ मलयाचलाय नमः । षडक्षरमहामन्त्राय । शस्त्रभृते ।
शस्त्रनायकाय । शास्त्रवेत्त्रे । शास्त्रीशाय । शस्त्रमन्त्रप्रपूजिताय ।
निर्वपवे । सुवपवे । कान्ताय । कान्ताजनमनोहराय । भगमालिने ।
भगाय । भाग्याय । भगघ्ने । भगपूजिताय । भगपूजनसन्तुष्टाय ।
महाभाग्यसुपूजिताय । पूजारताय । विपाप्माय नमः । ५४०

ॐ क्षितिबीजाय नमः । धरोप्तिकृते । मण्डलाय । मण्डलाभासाय ।
मण्डलार्द्धाय । विमण्डलाय । चन्द्रमण्डलपूज्याय ।
रविमण्डलमन्दिराय । सर्वमण्डलसर्वस्वाय । पूजामण्डलमण्डिताय ।
पृथ्वीमण्डलवासाय । भक्तमण्डलपूजिताय । मण्डलात्परसिद्धये ।
महामण्डलमण्डलाय । मुखमण्डलशोभाढ्याय । राजमण्डलवर्जिताय ।
निष्प्रभाय । प्रभवे । ईशानाय । मृगव्याधाय नमः । ५६०

ॐ मृगारिघ्ने नमः । मृगाङ्कशोभाय । हेमाढ्याय । हिमात्मने ।
हिमसुन्दराय । हेमहेमनिधये । हेमाय । हिमानीशाय । हिमप्रियाय ।

शीतवातसहाय । शीताय । अशीतिगणसेविताय । आशाश्रयाय । दिगात्मने ।
जीवाय । जीवाश्रयाय । पतये । पतिताशिने । पतये । पान्थाय नमः । ५८०

ॐ निःपान्थाय नमः । अनर्थनाशकाय । बुद्धिदाय । बुद्धिनिलयाय ।
बुद्धाय । बुद्धपतये । धवाय । मेधाकराय । मेधमानाय । मध्याय ।
मध्याय repeat । मधुप्रियाय । मधुव्याय । मधुमते । बन्धवे ।
धुन्धुमाराय । धवाश्रयाय । धर्मिणे । धर्मप्रियाय । धन्याय नमः । ६००

ॐ धान्यराशये नमः । धनावहाय । धरात्मजाय । धनाय ।
धान्याय । मान्यनाथाय । मदालसाय । लम्बोदराय । लङ्करिष्णवे ।
लङ्कानाथसुपूजिताय । लङ्काभस्मप्रियाय । लङ्काय ।
लङ्केशरिपुपूजिताय । समुद्राय । मकरावासाय । मकरन्दाय ।
मदान्विताय । मथुरानाथकाय । तन्द्राय । मथुरावासतत्पराय नमः । ६२०

ॐ वृन्दावनमनसे नमः । प्रीतये । वृन्दापूजितविग्रहाय ।
यमुनापुलिनावासाय । कंसचाणूरमर्दनाय । अरिष्टघ्ने ।
शुभतनवे । माधवाय । माधवाग्रजाय । वसुदेवसुताय । कृष्णाय ।
कृष्णाप्रियतमाय । शुचये । कृष्णद्वैपायनाय । वेधसे ।
सृष्टिसंहारकारकाय । चतुर्विधाय । विश्वहर्त्रे । धात्रे ।
धर्मपरायणाय नमः । ६४०

ॐ यातुधानाय नमः । महाकायाय । रक्षःकुलविनाशनाय । घण्टानादाय ।
महानादाय । भेरीशब्दपरायणाय । परमेशाय । पराविज्ञाय ।
ज्ञानगम्याय । गणेश्वराय । पार्श्वमौलये । चन्द्रमौलये ।
धर्ममौलये । सुरारिघ्ने । जङ्घाप्रतर्दनाय । जम्भाय । जम्भारातये ।
अरिन्दमाय । ओङ्कारगम्याय । नादेशाय नमः । ६६०

ॐ सोमेशाय नमः । सिद्धिकारणाय । अकाराय । अमृतकल्पाय । आनन्दाय ।
वृषभध्वजाय । आत्मने । रतये । आत्मगम्याय । यथार्थात्मने ।
नरारिघ्ने । इकाराय । कालाय । होतिप्रभञ्जनाय । ईशितारिभवाय ।
ऋक्षाय । ऋकारवरपूजिताय । ऌवर्णरूपाय । ऌकाराय ।
ॡवर्णस्थाय नमः । ६८०

ॐ ऌरात्मवते ऌरात्मवते नमः । ऐरूपाय । महानेत्राय ।
जन्ममृत्युविवर्जिताय । ओतवे । औतवे । अन्डजस्थाय । हन्तहन्त्रे ।
कलाकराय । कालीनाथाय । खञ्जनाक्षाय । खण्डाय । खण्डिताय ।

विक्रमाय । गन्धर्वेशाय । गणारातये । घण्टाभरणपूजिताय ।
ङकाराय । ङीप्रत्ययाय । चामराय नमः । ७००

ॐ चामराश्रयाय नमः । चीराम्बरधराय । चारवे ।
चारुचञ्चुश्वरेश्वराय । छत्रिणे । छत्रपतये । छात्राय ।
छत्रेशाय । छात्रपूजिताय । झर्झराय । झङ्कृतये । झञ्झसे ।
झञ्झेशाय । झम्पराय । झराय । झङ्केशाण्डधराय । झारिष्टाय ।
कष्टाय । कारपूजिताय । रोमहारये नमः । ७२०

ॐ वृषारये नमः । ढुण्ढिराजाय । झलात्मजाय । ढोलशब्दरताय ।
ढक्काय । ढकारेणप्रपूजिताय । तारापतये । तन्तवे । तारेशाय ।
स्तम्भसंश्रिताय । थवर्णाय । थूत्कराय । स्थूलाय । दनुजाय ।
दनुजान्तकृते । दाडिमीकुसुमप्रख्याय । दान्तारये । दर्दरातिगाय ।
दन्तवक्राय । दन्तजिह्वायै नमः । ७४०

ॐ दन्तवक्रविनाशनाय नमः । धवाय । धवाग्रजाय ।
धुन्धवे । धौन्धुमारये । धराधराय । धम्मिल्लिनीजनानन्दाय ।
धर्माधर्मविवर्जिताय । नागेशाय । नागनिलियाय । नारदादिभिरर्चिताय ।
नन्दाय । नन्दीपतये । नन्दिने । नन्दीश्वरसहायवते । पणाय ।
प्रणीश्वराय । पान्थाय । पाथेयाय । पथिकार्चिताय नमः । ७६०

ॐ पानीयाधिपतये नमः । पाथाय । फलवते । फलसंस्कृताय ।
फणीशतविभूषाय । फणीफूत्कारमण्डिताय । फालाय ।
फल्गुरथाय । फान्ताय । वेणुनाथाय । वनेचराय । वन्यप्रियाय ।
वनानन्दाय । वनस्पतये । गणेश्वराय । वालीनिहन्त्रे । वल्मीकाय ।
वृन्दावनकुतूहलिने । वेणुनादप्रियाय । वैद्याय नमः । ७८०

ॐ भगणाय नमः । भगणार्चिताय । भेरूण्डाय । भासकाय ।
भासिने । भास्कराय । भानुपूजिताय । भद्राय । भाद्रपदाय ।
भाद्राय । भद्रदाय । भाद्रतत्पराय । मेनकापतये । मन्द्राश्वाय ।
महामैनाकपर्वताय । मानवाय । मनुनाथाय । मदघ्ने । मदलोचनाय ।
यज्ञाशिने नमः । ८००

ॐ याज्ञिकाय नमः । यामिणे । यमभीतिविमर्दनाय । यमकाय ।
यमुनावासाय । यमसंयमदायकाय । रक्ताक्षाय । रक्तदन्ताय । राजसाय ।
राजसप्रियाय । रन्तिदेवाय । रत्नमतीरामनाथाय । रमाप्रियाय ।

लक्ष्मीकराय । लाक्षणिकाय । लक्षेशाय । लक्षपूजिताय । लम्बोदराय ।
लाङ्गलिकाय । लक्षलाभपितामहाय नमः । ८२०

ॐ बालकाय नमः । बालकप्रीताय । वरेण्याय । बालपूजिताय ।
शर्वाय । शर्विने । शरिणे । शस्त्रिणे । शर्वरीगणसुन्दराय ।
शाकम्भरीपीठसंस्थाय । शाकद्वीपनिवासकाय । षोढासमासनिलयाय ।
षण्ढाय । षाढवमन्दिराय । षाण्डवाडम्बराय । षाण्ड्याय ।
षष्ठीपूजनतत्पराय । सर्वेश्वराय । सर्वतत्त्वाय ।
सामगम्याय नमः । ८४०

ॐ समानकाय नमः । सेतवे । संसारसंहर्त्रे । साराय ।
सारस्वतप्रियाय । हर्म्यनाथाय । हर्म्यकर्त्रे । हेतुघ्ने । निहनाय ।
हराय । हालाप्रियाय । हलापाङ्गाय । हनुमते । पतये । अव्ययाय ।
सर्वायुधधराभीष्टाय । भयाय । भास्वते । भयान्तकृते ।
कुब्जाम्रकनिवासाय नमः । ८६०

ॐ झिण्टीशाय नमः । वाग्विदां वराय । रेणुकादुःखहन्त्रे ।
विराटनगरस्थिताय । जमदग्नये । भार्गवाय । पुलस्त्याय । पुलहाय ।
क्रतवे । क्रान्तिराजाय । द्रोणपुत्राय । अश्वत्थाम्ने । सुरथिने ।
कृपाय । कामाख्यनिलयाय । विश्वनिलयाय । भुवनेश्वराय ।
रघूद्वहाय । राज्यदात्रे । राजनीतिकरोव्रणाय नमः । ८८०

ॐ राजराजेश्वरीकान्ताय नमः । राजराजसुपूजिताय ।
सर्वबन्धविनिर्मुक्ताय । सर्वदारिद्र्यनाशनाय । जटामण्डलसर्वस्वाय ।
गङ्गाधारासुमण्डिताय । जीवदाताशयाय । धेनवे । यादवाय ।
यदुपुङ्गवाय । मूर्खवागीश्वराय । भर्गाय । मूर्खविद्यायै ।
दयानिधये । दीनदुःखनिहन्त्रे । दीनदात्रे । दयार्णवाय ।
गङ्गातरङ्गभूषाय । गङ्गाभक्तिपरायणाय ।
भगीरथप्राणदात्रे नमः । ९००

ॐ ककुत्स्थनृपपूजिताय नमः । मान्धातृजयदाय । वेणवे ।
पृथवे । पृथुयशसे । स्थिराय । जाल्मपादाय । जाल्मनाथाय ।
जाल्मप्रीतिविवर्द्धनाय । सन्ध्याभर्त्रे । रौद्रवपवे ।
महानीलशिलास्थिताय । शम्भलग्रामवासाय । प्रियानूपमपत्तनाय ।
शाण्डिल्याय । ब्रह्मशौण्डाख्याय । शारदाय । वैद्यजीवनाय ।

राजवृक्षाय । ज्वरघ्नाय नमः । ९२०

ॐ निर्गुण्डीमूलसंस्थिताय नमः । अतिसारहराय । जातीवल्कबीजाय । जलाय । नभसे । जाह्नवीदेशनिलयाय । भक्तग्रामनिकेतनाय । पुराणगम्याय । गम्येशाय । स्कान्दादिप्रतिपादकाय । अष्टादशपुराणानां कर्त्रे । काव्येश्वराय । प्रभवे । जलयन्त्राय । जलावासाय । जलधेनवे । जलोदराय । चिकित्सकाय । भिषजे । वैद्याय नमः । ९४०

ॐ निर्लोभाय नमः । लोभतस्कराय । चिदानन्दाय । चिदाभासाय । चिदात्मने । चित्तवर्जिताय । चित्स्वरूपाय । चिरायवे । चिरायुरभिदायकाय । चीत्कारगुणसन्तुष्टाय । अचलाय । आनन्दप्रदायकाय । मासाय । पक्षाय । अहोरात्रमृतुस्त्वयनरूपकाय । संवत्सराय । पराय । कालाय । कलाकाष्ठात्मकाय । कलये नमः । ९६०

ॐ सत्याय नमः । त्रेत्रे । द्वापराय । स्वायम्भुवाय । स्मृताय । स्वारोचिषाय । तामसाय । औत्तमिणे । रैवताय । चाक्षुषाय । वैवस्वताय । सावर्णये । सूर्यसम्भवाय । दक्षसावर्णिकाय । मेरुसावर्णिकाय । इतिप्रभाय । रौच्याय । भौत्याय । गव्याय । भूतिदाय नमः । ९८०

ॐ दराय नमः । रागज्ञानप्रदाय । रागिने । रागपरायणाय । नारदाय । प्राणनिलयाय । नीलाम्बरधराय । अव्ययाय । अनेकनाम्ने । गङ्गेशाय । गङ्गातीरनिकेतनाय । गङ्गाजलनिवासाय । गङ्गाजलपरायणाय । ९९३

वसिष्ठ उवाच ।
नाम्नोमेतत्सहस्रं वै नारदेनोदितं तु यत् ।
तत्तेद्य कथितं देवि सर्वापत्तिनिवारणम् ॥

पठतः स्तोत्रमेतद्वै नाम्नां साहस्रमीशितुः ।
दारिद्र्यं नश्यते क्षिप्रं षड्भिर्मासैर्वरानने ॥

यस्येदं लिखितं गेहे स्तोत्रं वै परमात्मनः ।
नित्यं सन्निहतस्तत्र महादेवः शिवान्वितः ॥

स एव त्रिषु लोकेषु धन्यः स्याच्छिवभक्तितः ।
शिव एव परं ब्रह्म शिवान्नास्त्यपरः क्वचित् ॥

ब्रह्मरूपेण सृजति पाल्यते विष्णुरूपिणा ।

रुद्ररूपेण नयति भस्मसात् स चराचरम् ॥

तस्मात्सर्वप्रयत्नेन मुमुक्षुः शिवमभ्यसेत् ।
स्तोत्रं सहस्रनामाख्यं पठित्वा श्रीशिवो भवेत् ॥

यं यं चिन्तयते कामं तं तं प्राप्नोत्यसंशयम् ।
पुत्रार्थी लभते पुत्रान्धनार्थी लभते धनम् ॥

राज्यार्थी लभते राज्यं यस्त्विदं नियतः पठेत् ।
दुःस्वप्ननाशनं पुण्यं सर्वपापप्रणाशनम् ॥

नास्मात्किञ्चिन्महाभागे ह्यन्यदस्ति महीतले ।
तावद्गर्जन्ति पापानि शरीरस्थान्यरुन्धति ॥

यावन्नपठते स्तोत्रं श्रीशिवस्य परात्मनः ।
सिंहचौरग्रहग्रस्तो मुच्यते पठनात्प्रिये ॥

सर्वव्याधिविनिर्मुक्तो लभते परमं सुखम् ।
प्रातरुत्थाय यः स्तोत्रं पठेत भक्तितत्परः ॥

सर्वापत्तिविनिर्मुक्तो धनधान्यसुतान्वितः ।
जायते नात्र सन्देह शिवस्य वचनं यथा ॥

इति स्कन्दपुराणान्तर्गता श्रीशिवसहस्रनामावलिः नमः ।

The nAmAvalI is based on the corresponding stotra.
It appears to have about 993 names.

Proofread by PSA Easwaran

*Shri Shiva Sahasranamavali 1000 Names*
pdf was typeset on March 11, 2023

Please send corrections to *sanskrit@cheerful.com*